दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लतृतीया
श्रावण 30 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-296 | 1 | अगस्त 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्री नरेन्द्रमोदी अद्य देहल्याः रक्तदुर्गात् स्वातन्त्र्यदिवसावसरे राष्ट्रस्य नेतृत्वं करिष्यति

3 कोलम्बिया-भूकम्प- भूकम्पानन्तरं साहाय्योद्धारार्थं क्रियमाणान् प्रयत्नान् समर्थनाय भारतं कोलम्बिया-देशं प्रति विंशति मेट्रिक्-टन् मितं साहाय्यसामग्रीनां प्रथमं खण्डं प्रेषितम्

7 सनातनधर्म-आदर्श-संस्कृतमहाविद्यालये, डोहग्यां भव्य-तिरङ्गा-यात्रायाः आयोजनम्

## अद्यतनीयं सुभाषितम्

**गायन्ति देवाः किल गीतकानि,**
**धन्यास्तु ते भारतभूमिभागे।**
**स्वर्गापवर्गास्पदमार्गभूते,**
**भवन्ति भूयः पुरुषाः सुरत्वात्।।**

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




# वैश्विक-अस्थिरतायाः मध्ये भारतं तीव्रतमं वर्धमाना प्रमुख-अर्थव्यवस्थाः राष्ट्रपतिः द्रौपदी मुर्मु



राष्ट्रपतिः द्रौपदी मुर्मु महोदया स्वातन्त्र्यदिनस्य पूर्वसन्ध्यायां राष्ट्रं सम्बोधितवती। सा राष्ट्रनिर्माणे देशस्य प्रगतौ च महत्त्वपूर्णां भूमिकां निर्वहतां प्रत्येकस्य नागरिकस्य प्रशंसां कृतवती। राष्ट्रपतिमहोदया त्रिसेनायाः सैनिकानां आरक्षक-कर्मचारिणां च कर्तव्यनिष्ठायाः तथा विश्वपटले भारतस्य मान-सम्मानं वर्धयतां प्रवासी-भारतीयानां विशेषतया प्रशंसां कृतवती।

स्वसम्बोधने राष्ट्रपतिमहोदया अवदत् यत् विश्वस्य अनेकेषु क्षेत्रेषु युद्धस्य अस्थिरतायाः च प्रभावः सर्वेषु देशेषु पतति। एतादृश्यां परिस्थितौ अपि भारतस्य अर्थव्यवस्था तीव्रगत्या अग्रे सरति। आर्थिकानुमानानुसारं भारतस्य विकासदरः विश्वस्य औसत-विकासदरस्य तुलनया द्विगुणादपि अधिकः भविष्यति। राष्ट्रपतिमहोदया अवदत् यत् 'आत्मनिर्भर-भारत-अभियानेन' अस्माकं आर्थिकप्रगतेः राष्ट्रियसुरक्षायाश्च आधारः सुदृढः जातः। सत्यस्य न्यायस्य च पक्षे मानवता-विरोधि-शक्तिषु विजयस्य भारतीयां परम्परां रेखाङ्कयन्ती राष्ट्रपतिमहोदया अवदत् यत् वयं २६ जुलै-दिनाङ्के कारगिल-विजयदिनम् अमानयाम तथा च ७ मे-दिनाङ्के 'ऑपरेशन सिन्दूर' इत्यस्य प्रारम्भस्य एकवर्षपूर्तौ स्वसेनायाः अतुल्यपराक्रमस्य स्मरणम् अकुर्म। आतङ्कवादस्य विरुद्धम् एतेन ऐतिहासिक-अभियानेन (ऑपरेशन) आतङ्कवादिभ्यः तेषां समर्थकेभ्यश्च एषः दृढः सन्देशः दत्तः यत् ते यत्र कुत्रापि प्रच्छन्नाः भवन्तु, स्वकृतकर्मणः दण्डं ते अवश्यमेव प्राप्स्यन्ति।

दशकेभ्यः गम्भीरं सङ्कटं जातस्य नक्सलवादस्य उल्लेखं कुर्वती सा अवदत् यत् भारतं नक्सलमुक्तं करणम् एका महती उपलब्धिः अस्ति। अधुना नक्सलग्रस्त-क्षेत्रेषु विकासस्य धारा प्रवहति। 'बस्तर-ओलम्पिक' स्पर्धायां क्रीडकानां, 'बस्तर-पण्डुम' उत्सवे कलाकाराणां, तथा च एतेषु आयोजनेषु दर्शकानां महत्यां संख्यायां सहभागिता नक्सलमुक्तक्षेत्रस्य प्रमाणम् अस्ति।

राष्ट्रपतिमहोदया अवदत् यत् भारतस्य विदेशनीतिः देशहिते आधारिता अस्ति तथा च शान्तिः, सहयोगः, संवादः, वसुधैव कुटुम्बकम् इत्येते आदर्शाः अस्माकं विदेशनीतेः स्तम्भाः सन्ति। आर्थिकसहयोगं वर्धयितुं भारतेन अनेकैः देशैः सह 'मुक्तव्यापार-सन्धिः' (Free Trade Agreement) कृतः। अविकसितदेशेषु भारतम् अग्रणीं भूमिकां निर्वहति। विश्वपटले देशस्य सम्मानं वर्धितम्। श्रीमती मुर्मु महोदया अवदत् यत् भारतं नियमाधारितायां अन्ताराष्ट्रियव्यवस्थायां विश्वासं करोति तथा च संयुक्तराष्ट्रसङ्घसहितेषु बहुपक्षीयसङ्घटनेषु वैश्विकसमुदायस्य समुचितं प्रतिनिधित्वम् इच्छति। सा अवदत् यत् एतस्मै प्रयासाय अनेकेषां देशानां समर्थनमपि प्राप्यते।राष्ट्रपतिः मुर्मु महोदया शिक्षाक्षेत्रे बालिकानां प्रभावी-प्रदर्शनस्य प्रशंसां कृतवती। सा कृषिक्षेत्रे उत्पादकतां वर्धयितुं 'ड्रोन-दीदी' इत्यस्याः योगदानात् आरभ्य सेनासहितेषु विविधक्षेत्रेषु महिलानां सहभागितायाः उल्लेखं कृतवती। सा अवदत् यत् राष्ट्रमण्डल-क्रीडासु देशस्य कुल-१३-स्वर्णपदकेषु ८ स्वर्णपदकानि कन्याभिः जितानि। महिलानाम् आर्थिकनिर्भरतायाः वर्धनस्य उल्लेखं कुर्वती सा अवदत् यत् स्वसहायता-समूहेषु १० कोटितः अधिकाः महिला-सदस्याः सन्ति, अस्माकं देशश्च ३ कोटि-महिलाः 'लखपति-दीदी' इति कर्तुं लक्ष्यं प्रति अग्रेसरः अस्ति। सा अवदत् यत् 'मुद्रा-योजना' अन्तर्गतं साहाय्यं प्राप्तवत्सु उद्यमिषु प्रायः द्वौ तृतीयांशौ लाभार्थिनः महिलाः एव सन्ति। राष्ट्रपतिमहोदया महात्मा-ज्योतिबा-फुले-महोदयस्य २०० तमे जयन्त्युत्सवे तस्य उल्लेखं कुर्वती अवदत् यत् महात्मा-फुले तथा च सावित्रीबाई-फुले महोदयाभ्यां महिला-सशक्तीकरणस्य, सामाजिक-न्यायस्य, शिक्षायाः, समानतायाश्च क्षेत्रे ऐतिहासिकं योगदानं दत्तम्।

# राष्ट्रपतेः सम्बोधनम्...

राष्ट्रपतिः द्रौपदी मुर्मु महोदया देशस्य 'डिजिटल-इन्फ्रास्ट्रक्चर' (अङ्कीय-संरचनां) विश्वस्य बृहत्तमां सर्वोत्तमां च भुगतान-व्यवस्थां कथितवती। सा अवदत् यत् मार्गपार्श्वे (रेहड़ी-पटरी) तथा ग्रामस्य लघु-विपणिषु अपि अङ्कीय-भुगतानं (डिजिटल पेमेन्ट्) भवति। सा अवदत् यत् विश्वस्य अर्धादपि अधिकानि अङ्कीय-व्यवहार-कार्याणि (डिजिटल ट्रान्जेक्शन) भारते एव भवन्ति। देशवासिनः सर्वकारश्च मिलित्वा अङ्कीय-क्रान्तेः (डिजिटल-क्रान्तेः) उदाहरणं विश्वस्य समक्षम् उपस्थापितवन्तः। राष्ट्रपतिमहोदया स्वातन्त्र्यदिनस्य पूर्वसन्ध्यायां स्वसम्बोधने अवदत् यत् भारतस्य संविधानं जनसहभागितया निर्मितम् अस्ति। जनसहभागितायाः भावना लोकतन्त्रस्य जनन्यां भारतभूमौ सर्वदैव स्थिता, देशवासिनश्च नूतनोर्जया सह राष्ट्रियाभियानानि अग्रे नयन्ति, या अस्माकं लोकतन्त्रस्य प्रेरिका उपलब्धिः अस्ति। सा अवदत् यत् व्यक्तेः गरिमा, प्रतिष्ठा, अवसरस्य समानता च अस्माकं संविधानस्य प्रमुखादर्शाः सन्ति। सा पूर्णविश्वासेन अवदत् यत् भारते प्रत्येकः जनः महतः स्वप्नान् द्रष्टुं शक्नोति तान् च पूरयितुमपि शक्नोति। राष्ट्रपतिः द्रौपदी मुर्मु महोदया अवदत् यत् अस्माकं बहवः युवानः स्वयमुद्योगम् (स्वरोजगारम्) अङ्गीकुर्वन्तः अन्येभ्यः उद्योगं दातुं क्षमतामपि दृढयन्ति। युवसहभागितया देशे दृढं 'स्टार्टअप-इकोसिस्टम' विकसितं जातम्। सा अवदत् यत् छात्राः भारतस्य भविष्यनिर्मातारः सन्ति, तेषां वर्तमानाय भविष्याय च सर्वेषां प्रयासः आवश्यकः अस्ति। राष्ट्रपतिमहोदया अवदत् यत् सर्वकारः परीक्षाप्रणाल्यां सुधारार्थम् अनुचितसाधनानां नियमनार्थं च व्यापकानि सोपानानि स्वीकरोति। राष्ट्रपतिमहोदया अवदत् यत् युवा-जनसंख्या देशस्य बहुमूल्यतमा सम्पत्तिः अस्ति। भारतस्य कुलजनसंख्यायां ६५ प्रतिशतं जनाः ३५ वर्षतः न्यूनावस्थायाः सन्ति। सा अवदत् यत् देशस्य युवानः प्रतिभावन्तः, निष्ठावन्तः, कौशलसम्पन्नाश्च सन्ति, एतादृशैः युवाभिः विश्वसमुदाये भारतस्य प्रतिष्ठा वर्धिता। सा अवदत् यत् युवा-पीढी भारतस्य स्वर्णिमभविष्यं प्रति विश्वासं दृढयति। राष्ट्रपतिः मुर्मु महोदया अवदत् यत् यत्र एकतः अस्माकं देशे विश्वस्य बृहत्तमा युवा-जनसंख्या वर्तते, तत्रैवान्यतः ज्येष्ठनागरिकाणां संख्या अपि निरन्तरं वर्धते। सर्वकारेण ज्येष्ठनागरिकाणां जीवनं सुखमयं कर्तुं बहवः उपायाः कृताः। ७० वर्षस्य तदधिकस्य वा प्रायः ६ कोटि-ज्येष्ठनागरिकेभ्यः प्रतिवर्षं ५ लक्ष-रूप्यकाणि यावत् निःशुल्क-स्वास्थ्यसेवा उपलभ्यते। राष्ट्रपतिमहोदया अवदत् यत् स्वातन्त्र्यस्य शताब्दीवर्षे २०४७ यावत् 'विकसित-भारतस्य' निर्माणाय सम्पूर्णः देशः एकीभूय अग्रे सरति। सा अवदत् यत् अन्त्योदयस्य भावनया सह विकासस्य लाभं प्रत्येकं जनं प्रति प्रापयितुं सङ्कल्पः सुदृढः अस्ति। स्वकीयां समृद्धां परम्परां स्वातन्त्र्यसङ्ग्रामस्य आदर्शान् च अङ्गीकृत्य वयं आधुनिकविकासस्य मार्गे अग्रेसराः स्मः। स्वसम्बोधनस्य अन्ते राष्ट्रपतिमहोदया महतः तेलुगु-साहित्यकारस्य गुर्जाडा-अप्पाराव-महोदयस्य एकस्य गीतस्य उल्लेखम् अकरोत्, यस्य भावः अस्ति – "स्वदेशे स्निह्यतु, सर्वहितं वर्धयतु; देशः इत्युक्ते केवलं मृत्तिका न, अपि तु समग्रः जनसमुदायः अस्ति।" राष्ट्रपतिमहोदया अवदत् यत् सर्वेषां भारतीयानां विकासः कल्याणं च एव विकसितभारतस्य निर्माणस्य वास्तविकं लक्ष्यम् अस्ति।

# प्रधानमन्त्री नरेन्द्रमोदी अद्य देहल्याः रक्तदुर्गात् स्वातन्त्र्यदिवसावसरे राष्ट्रस्य नेतृत्वं करिष्यति



अद्य राष्ट्रं अशीतितमः स्वातन्त्र्यदिवसः आचर्यते। प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याः रक्तदुर्गात् उत्सवस्य नेतृत्वं करिष्यति। भारतीय वायुसेनायाः एम्. आई.-17 इति द्वे उदग्र-विमानयाने अस्मिन् स्थले पुष्पवृष्टिं करिष्यतः। राष्ट्रध्वजारोहणं एकविंशति गन्-सल्यूट् इत्यनेन सह भविष्यति। पुष्पवृष्टेः अनन्तरं प्रधानमन्त्री रक्तदुर्गस्य प्राकारात् राष्ट्रम् अभिसंबोधयिष्यति। अयं भव्योत्सवः राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धैकशत वर्षाणां चिरस्थायीपरम्परायाः स्मरणार्थं, सप्तचत्वारिंशत् द्विसहस्रतमवर्षपर्यन्तं विकसितभारतं प्रति भारतस्य यात्राम् अग्रे नेतुं युवशक्तेः ऊर्जायाः, आकांक्षायाः, महत्त्वपूर्णं योगदानस्य च उत्सवार्थं निर्धारितः अस्ति। अवधेयं वर्तते यत् प्रथमवारं, रक्तदुर्गस्य उत्सवेषु वन्दे मातरम् इत्यस्य गायनम् भविष्यति। सर्वकारेण दिल्ली-एन्. सी. आर्. क्षेत्रात् प्रधानमन्त्री-विश्वकर्मा-योजनायाः शतं यावत् लाभार्थयः 'विशिष्टातिथि' रूपेण आमन्त्रिताः। दिल्ली-नगरस्य रक्तदुर्गस्य अशीतितमस्वतन्त्रता-दिवसस्य समारोहे सम्मिलितुं सर्वकारेण दिल्ली-एन्. सी. आर्. क्षेत्रात् प्रधानमन्त्री-विश्वकर्मा-योजनायाः शतं यावत् लाभार्थयः 'विशिष्टातिथि' रूपेण आमन्त्रिताः। सूक्ष्म-लघु-मध्यम-उद्यम-मन्त्रालयः सूचितवान् यत् लाभार्थिभ्यः तेषां सम्मानाय प्रशंसायै च प्रतीकत्वेन स्मृतिचिह्नानि अपि प्रदीयन्ते, तदनन्तरम् अद्य एम्. एस्. एम्. ई. मन्त्रालयस्य अधिकारिभिः सह संवादो भविष्यति।

# स्वतन्त्रता-दिवसावसरे दिल्ली-मेट्रो-सेवाः सर्वेषां कृते अन्तिम स्थानकेभ्यः प्रातः चतुर्वादनतः एव प्रारम्भिताः



स्वतन्त्रता-दिवसावसरे दिल्ली-मेट्रो-सेवाः सर्वेषां कृते अन्तिम स्थानकेभ्यः प्रातः चतुर्वादनतः एव प्रारम्भिताः। दिल्ली-मेट्रो-निगमेन निगदितं यत् एषः निर्णयः स्वतन्त्रता-दिवस-समारोहे सहभागितायै आगच्छतां विशेषातिथीनाम्, आमन्त्रितानाम्, सामान्य जनसमूहस्य च सुगम-गमनागमनाय गृहीतः । निगमेन स्पष्टीकृतं यत् नियमित सारण्याः अनुसारं सामान्य-सेवायाः प्रारम्भात् पूर्वम् त्रिंशत्-निमेषाणाम् अन्तरालेन यानानि उपलब्धानि भविष्यन्ति ।

# राष्ट्रपतिः द्रौपदी मुर्मूः राष्ट्रपतिभवने दक्षिणमध्यक्षेत्र-सांस्कृतिककेन्द्रस्य, सङ्गीत-नाटक-अकादम्याः च कलाविदां समूहेन सह वार्तालापम् अकरोत्



राष्ट्रपतिः द्रौपदी मुर्मूः राष्ट्रपतिभवने भोपाल-नगरस्य आई.जी.आर्.एम्.एस्., दक्षिणमध्यक्षेत्र-सांस्कृतिककेन्द्रस्य, सङ्गीत-नाटक-अकादम्याः च कलाविदां समूहेन सह वार्तालापम् अकरोत्। सामाजिकान्तर्जालीये-लेखे राष्ट्रपतिः अलिखत् यत् एतेषां कलाकाराणां कलाकृतयः राष्ट्रपतिभवने स्वातन्त्र्यदिवसावसरे प्रदर्श्यन्ते।

# विभाजन-विभीषिका-स्मरणदिवसः आचरितः, प्रधानमन्त्री, गृहमन्त्री, रक्षामन्त्री च विभाजनस्य समये प्राणत्यागं कृतवद्भ्यः सर्वेभ्यः श्रद्धाञ्जलिम् अर्पितवन्तः

सम्पूर्ण-देशे 'विभाजन-विभीषिका-स्मृति-दिवसः' आचरितः। अस्मिन् अवसरे प्रधानमन्त्रिणा नरेन्द्र-मोदिना, गृह-मन्त्रिणा अमित शाहेन तथा रक्षा-मन्त्रिणा राजनाथ सिंहेन विभाजनस्य आपत्-काले प्राणान् त्यक्तवद्भ्यः, अत्याचारैः सह सङ्घर्षं कृतवद्भ्यश्च सर्वेभ्यः जनेभ्यः भावपूर्णा श्रद्धाञ्जलिः अर्पिता । सामाजिकान्तर्जालीये स्वकीये सन्देशे प्रधानमन्त्रिणा मोदिना विभाजनं इतिहासस्य तादृशः क्षणः इति अभिहितः, येन अनन्तानां जनानां जीवनानि छिन्न-भिन्नानि अभवन्, परिवाराः स्व-गृहेभ्यः उन्मूलिताः, स्वजनाः विच्छिन्नाः, जनाश्च असह्यां वेदनां सोढवन्तः। तेन आशा प्रकटीकृता यत् अयम् अवसरः देशे सद्भावस्य भ्रातृभावस्य च रक्षणाय, 'विकसित-भारतस्य' निर्माणाय च सामूहिक-सङ्कल्पं सुदृढं करिष्यति।

# जम्मू-कश्मीरस्य ऊधमपुर-मण्डले ग्राम-सुरक्षा-दलस्य एकः सदस्यः हतः, अपरश्च गम्भीररुपेण क्षतः सञ्जातः

जम्मू-कश्मीरस्य ऊधमपुर-मण्डले ग्राम-सुरक्षा-दलस्य एकः सदस्यः हतः, अपरश्च गम्भीररुपेण क्षतः सञ्जातः, यदा तेषां सहयोगिना एव आन्तरिक विवादस्य अनन्तरम् ताभ्यां उपरि गोलिका-प्रहारः कृतः। आकाशवाणी-जम्मू-वार्ताहरः ज्ञापयति यत् एषा घटना ऊधमपुरस्य सुदूर-पञ्चैरी-क्षेत्रे तदा अभवत् यदा वि-डी-जी-सदस्याः डमनोट्-आरक्षी-स्थानं प्रति गच्छन्तः आसन्। आहतेभ्यः जनेभ्यः क्षतः सदस्यः त्वरितम् चिकित्सालयं प्रापितः, यदा तु सूचनां प्राप्य आरक्षी-दलम् तत्क्षणमेव घटना स्थलम् प्राप्तवत्। अभियुक्तस्य ग्रहणाय प्रयासाः अनवरतं चलन्ति। विवादस्य यथार्थ-कारणं घटना-क्रमश्च अधुना अन्वेषणीयौ स्तः। आरक्षिभिः अस्याः घटनायाः संज्ञानं गृहीत्वा अग्रिमा अन्वेषणा प्रारब्धा अस्ति।

## कोलम्बिया-भूकम्प- भूकम्पानन्तरं साहाय्योद्धारार्थं क्रियमाणान् प्रयत्नान् समर्थनाय भारतं कोलम्बिया-देशं प्रति विंशति मेट्रिक्-टन् मितं साहाय्यसामग्रीनां प्रथमं खण्डं प्रेषितम्



भूकम्पस्य पश्चात्-पुनर्निर्माण-कार्येषु साहाय्यार्थं भारतेन कोलम्बिया-देशाय विंशति-मीट्रिक टन् परिमितायाः साहाय्य सामग्र्याः प्रथम-भागः प्रेषितः। विदेश-मन्त्रिणा डॉ. एस. जयशङ्करेण सामाजिक-पटलेषु एकस्मिन् सन्देशे उक्तं यत् अस्यां साहाय्य सामग्र्याम् औषधानि, चिकित्सा-उपकरणानि, अस्थायी-आश्रयाः, स्वच्छता सामग्री तथा आपत् अनन्तरम् आवश्यकाणि अन्यानि अनिवार्य-वस्तूनि समाविष्टानि सन्ति। डॉ. जयशङ्करेण अग्रे प्रोक्तं यत् अस्मिन् सङ्कट-समये भारतं कोलम्बिया-देशस्य जनैः सह दृढतया अवतिष्ठते। एतत् प्रेषणम् आपत्काले भारतस्य अन्ताराष्ट्रिय-सहयोगस्य प्रतिबद्धताम् एव स्पष्टीकरोति ।

## छत्तीसगढ-राज्ये, पूर्वीमध्यप्रदेशे, हिमाचलप्रदेशे, झारखण्डे, उत्तरप्रदेशे,

### उत्तराखण्डे च अत्यधिकवृष्टेः सञ्चेतना प्रसारिता अस्ति

भारत-ऋतु-विभागेन छत्तीसगढ-पूर्वीमध्यप्रदेश-हिमाचलप्रदेश-झारखण्ड-उत्तरप्रदेश-उत्तराखण्डेषु च अत्यधिकवृष्ट्यै नारङ्गवर्णीया पूर्वसञ्चेतना प्रदत्ता अस्ति। अगामि द्विदिवसेषु दिल्ली-हरियाणा-चण्डीगढ-पञ्जाब-पश्चिमीमध्यप्रदेश- मध्यमहाराष्ट्र-ओडिशा-विदर्भ-उपहिमालयीपश्चिमबङ्गाल-भारतस्य पूर्वोत्तरभागेषु च प्रचण्डवृष्टिः भवितुम् अर्हति। हिमाचलप्रदेशस्य अनेकेषु भागेषु प्रावृट्कालः पुनः तीव्रः अभवत् । अद्यारभ्य हिमाचलप्रदेशस्य अनेकेषु भागेषु प्रावृट्कालः पुनः तीव्रः अभवत्, प्रातःकालादेव केषुचित् क्षेत्रेषु प्रचण्डवृष्टिः दरीदृश्यते। अनेकेषु मण्डलेषु प्रचण्डवृष्ट्या नदीनां जलस्तरः वर्धितः अस्ति। प्रशासनेन जनाः सावधानेन स्थातुम् आहूताः। ओडिशा-राज्ये, दिनद्वयोः अविरामवृष्ट्या राज्यस्य उत्तरभागेषु नूतनजलाप्लावस्य आशङ्का समुत्पन्ना, यत्र अनेकाः नद्यः द्रुतगत्या उद्बुद्धाः, सङ्कटस्तरं च अतिक्रमन्ति ।

## शासकीय नियुक्ति-विधान-शोधनाय छात्राणाम् आन्दोलनम् एकविंशतितमं दिवसं प्राप्नोति

झारखण्ड-राज्यस्य राञ्ची-नगरे शासकीय नियुक्ति-विधान-शोधनाय छात्राणाम् आन्दोलनम् एकविंशतितमं दिवसं प्राप्नोति। जयपाल-सिंह-मुण्डा-क्रीडाङ्गणे छात्र-नेतृणां शासनस्य च मध्ये सञ्जातः सङ्घर्षः उत्तरोत्तरं जटिलताम् उपैति ।

## केन्द्रीय अन्वेषण-ब्यूरो इति संस्थायाः एकविंशतिः अधिकारिणः विशिष्ट-सेवा-कृते राष्ट्रपति पदकेन तथा 'श्लाघनीय-सेवा-पदकेन' भूषिताः




अशीतितमस्य स्वतन्त्रता-दिवसस्य पावनावसरे केन्द्रीय अन्वेषण-ब्यूरो इति संस्थायाः एकविंशतिः अधिकारिणः विशिष्ट-सेवा-कृते राष्ट्रपति पदकेन तथा 'श्लाघनीय-सेवा-पदकेन' भूषिताः। एतेषु षट् अधिकारिणः 'विशिष्ट-सेवायाः कृते राष्ट्रपति पदकमपि अलभन्त । येषु शोभा दत्ता, मनोज बनर्जी, गिन्नी राणा, सञ्जय कुमार सामलश्च अन्तर्भवन्ति। पञ्चदश-अधिकारिणश्च तेषां निष्ठापूर्ण-कार्यस्य कृते श्लाघनीय-सेवा-पदकेन' सम्मानिताः।

## स्वातन्त्र्यदिनम् २०२६: १०५७ कर्मचारिभ्यः वीरता-सेवा-पदकानां घोषणा

सर्वकारेण २०२६ तमस्य वर्षस्य स्वातन्त्र्यदिनस्य अवसरे आरक्षक-, अग्निशमनसेवा-, गृह-रक्षक- (होम गार्ड), नागरिकसुरक्षा- तथा च सुधारसेवा-विभागस्य १०५७ कर्मचारिभ्यः वीरता-सेवा-पदकानि दातुं घोषणा कृता। गृहमन्त्रालयेन अद्य वीरतायाः ३०१ पदकानां सूची प्रकाशिता। एतेषु आरक्षककर्मचारिभ्यः २७२ तथा च अग्निशमनसेवा-कर्मचारिभ्यः २९ पदकानि सम्मिलितानि सन्ति।

जीवनस्य सम्पत्तेश्च रक्षणे, अपराधस्य निवारणे अथवा अपराधिनां ग्रहणे उल्लेखनीयं साहसम् अङ्गीकृत्य वीरतापदकं प्रदीयते। ३०१ वीरतापदकेषु वामपन्थि-उग्रवाद-प्रभावितानां क्षेत्राणां १९७, जम्मू-कश्मीरस्य ५१, पूर्वोत्तरक्षेत्रस्य १२ तथा च अन्यक्षेत्राणां ४१ कर्मचारिणः सम्मिलिताः सन्ति।

आहत्य ९२ 'राष्ट्रपतिपदकानि' अपि प्रदत्तानि। एतेषु आरक्षकसेवातः ८३, अग्निशमनसेवातः चत्वारि, नागरिकसुरक्षा-गृहरक्षकसेवातः त्रीणि तथा च सुधारसेवातः द्वे पदके सम्मिलिते स्तः।

अतिरिच्य, ६६४ 'प्रशंसनीयसेवापदकानि' (सराहनीय सेवा पदक) प्रदत्तानि सन्ति। एतेषु आरक्षकसेवातः ६०६, अग्निशमनसेवातः २८, नागरिकसुरक्षा-गृहरक्षकसेवातः १८ तथा च सुधारसेवातः १२ कर्मचारिणः सम्मिलिताः सन्ति।

## प्रदेशस्य विद्यालयेषु १७ अगस्त-दिनाङ्के अवकाशः भविष्यति, मुख्यमन्त्रिणा सुक्खुना बिलासपुरे कृता घोषणा

हिमसंस्कृतवार्ताः - शिमला।

स्वातन्त्र्यदिवसस्य सन्दर्भे शिक्षाविभागेन निर्गतदेशानां मध्ये अधुना प्रदेशस्य विद्यालयेषु १७ अगस्त-दिनाङ्के अवकाशः भविष्यति। मुख्यमन्त्री सुखविन्द्रसिंह-सुक्खुः शुक्रवासरे बिलासपुरजनपदस्य घुमारवीं विधानसभाक्षेत्रस्य निहारी इति स्थाने आयोजिते राज्यस्तरीय-वृक्षारोपण-महोत्सवे एतां घोषणां कृतवान्। मुख्यमन्त्रिणा स्पष्टं कृतं यत् १५ अगस्त-दिनाङ्के आयोज्यमानानां कार्यक्रमाणां कारणेन विद्यार्थिभ्यः शिक्षकभ्यश्च १७ अगस्त-दिनाङ्के अवकाशः प्रदास्यते। शिक्षानिदेशालयेन कतिपयदिनानि पूर्वं आदेशः निर्गतः आसीत् यत् प्रदेशस्य सर्वेषु सर्वकारीय-विद्यालयेषु १५ अगस्त-दिनाङ्के सामान्यरूपेण पठन-पाठनं भविष्यति।

आदेशेषु उक्तमासीत् यत् विद्यालयेषु स्वातन्त्र्यदिवसः सम्पूर्णेन उत्साहेन, गरिम्णा देशभक्तिपूर्णेन च वातावरणेन आचरितः भवेत्। तदनन्तरं जनपद, उपमण्डल तथा तहसीलस्तरे आयोजितेषु समारोहेषु विद्यार्थिनां विद्यालयानां च सहभागिता सुनिश्चितकर्तुं निर्देशाः अपि प्रदत्ताः आसन्। जनपद-उपनिदेशकान् स्व-स्व-जनपदेषु सर्वेभ्यः सर्वकारीय-विद्यालयेभ्यः स्वातन्त्र्यदिवस-समारोहस्य विषये आवश्यकान् निर्देशान् निर्गन्तुं कथितमासीत्। मुख्यमन्त्रिणः घोषणया प्रदेशस्य सर्वेभ्यः विद्यार्थिभ्यः शिक्षकेभ्यश्च १५ अगस्त-दिनाङ्के कार्यक्रमेषु सहभागितां कृत्वा अग्रिमे कार्यदिवसे अवकाशः प्राप्तुं शक्यते।

## प्रथमवारं मुख्यमन्त्रिणः प्रत्यक्षं सम्बोधनं श्रोष्यन्ति लक्षशः छात्राः

प्रदेशे शुक्रवासरे आचर्यमाणः ७९तमः स्वातन्त्र्यदिवसः अस्मिन् वर्षे सर्वकारीय-विद्यालयानां कृते अनेकदृष्ट्या विशेषः भविष्यति। ध्वजारोहण-सांस्कृतिककार्यक्रमेभ्यः अग्रे गत्वा अस्मिन् वर्षे समारोहः राष्ट्रभक्तेः, राष्ट्रीयचेतनायाः, सामाजिकजागरूकतायाः युवसहभागितायाश्च व्यापकः उत्सवः भविष्यति। सर्वाधिकं महत्त्वपूर्णं यत् प्रदेशस्य सर्वकारीय-विद्यालयेषु प्रथमवारं मुख्यमन्त्रिणः सुखविन्द्रसिंह-सुक्खोः राज्यस्तरीयस्य सम्बोधनस्य प्रत्यक्षप्रसारणं भविष्यति, यत् लक्षशः विद्यार्थिनः एकस्मिन् समये द्रष्टुं श्रोतुं च शक्नुवन्ति।राज्यस्तरीयः समारोहः हमीरपुरजनपदस्य बड़सर इति स्थाने भविष्यति, यत्र मुख्यमन्त्री राष्ट्रध्वजम् आरोहयित्वा प्रदेशवासिभ्यः सम्बोधनं करिष्यति। शिक्षानिदेशालयेन निर्गते क्षण-प्रतिक्षण-कार्यक्रमानुसारं स्वातन्त्र्यदिवस-समारोहस्य शुभारम्भः ध्वजारोहणेन राष्ट्रगानेन च भविष्यति। ततः मुख्यातिथेः सन्देशः पठिष्यते तथा विद्यार्थिभ्यः स्वातन्त्र्यसङ्ग्रामस्य इतिहासेन देशस्य महान् राष्ट्रनायकानां योगदानेन च परिचयः कारयिष्यते।निर्देशानुसारं षष्ठीतः द्वादशकक्षापर्यन्तं विद्यार्थिनः स्व-सम्बद्धेषु राजकीय-वरिष्ठ-माध्यमिक-विद्यालयेषु समारोहेषु सम्मिलिताः भविष्यन्ति।

# मुख्यमन्त्रिणः हमीरपुराय शिक्षायै स्वास्थ्याय च महान् उपहारः, उद्घाट्यते हिमाचलस्य प्रथमः विज्ञानमहाविद्यालयः





**हिमसंस्कृतवार्ताः- हमीरपुरम्।** मुख्यमन्त्री ठाकुरसुखविन्दरसिंहसुक्खुः शुक्रवासरे हमीरपुराय शिक्षायाः, स्वास्थ्यस्य विकासस्य च क्षेत्रेषु अनेकान् महत्त्वपूर्णान् उपहारान् प्रदत्तवान्। तेन हिमाचलप्रदेशस्य प्रथमं विज्ञानमहाविद्यालयं हमीरपुरे उद्घाटयितुं घोषणा कृता। प्रायः १०० कोटिरूप्यकाणां व्ययेन निर्मीयमाणस्य अस्य महाविद्यालयस्य कृते ८० कनाल-परिमिता भूमिः चिह्निता अस्ति, परियोजनायै २० कोटिरूप्यकाणि निर्गतानि सन्ति।

मुख्यमन्त्रिणा हमीरपुरे सहायक- स्वास्थ्यसेवा- महाविद्यालयस्य स्थापनस्य घोषणापि कृता। तदतिरिक्तं जनपदे ७४ एकड़-परिमितायां भूमौ एम्स-स्तरीयस्य आयुर्वेदिक-संस्थानस्य स्थापना करिष्यते। मुख्यमन्त्री हमीरपुर- राजकीय- महाविद्यालयस्य वार्षिकपुरस्कार- वितरणसमारोहे मुख्यातिथिरूपेण उपस्थितः आसीत्। अस्मिन् अवसरे तेन विभिन्नेषु क्षेत्रेषु उत्कृष्टं प्रदर्शनं कृतवन्तः विद्यार्थिनः सम्मानिताः। मुख्यमन्त्रिणा उक्तं यत् काङ्गड़ां प्रदेशस्य पर्यटनराजधानीरूपेण, हमीरपुरं शिक्षाराजधानीरूपेण विकसितं क्रियते। हमीरपुरस्य विद्यार्थिनः सम्पूर्णदेशे प्रदेशस्य नाम गौरवान्वितं कुर्वन्ति। सर्वकारस्य सर्वोच्चं प्राधान्यम् विद्यार्थिभ्यः गुणवत्तापूर्णशिक्षां प्रदातुम् अस्ति।

## शिक्षाव्यवस्थायां परिष्कारस्य पक्षः:-

मुख्यमन्त्रिणा उक्तं यत् वर्षे २०२१ तमे हिमाचलप्रदेशः गुणवत्तापूर्णशिक्षायाः विषये २१ तमे स्थाने आसीत्, किन्तु वर्तमानसर्वकारेण कृतेषु विकासकार्येषु अनन्तरं प्रदेशः अधुना पञ्चमे स्थाने प्राप्तः अस्ति। तेन उक्तं यत् सर्वकाराः आगच्छन्ति गच्छन्ति च, किन्तु ग्रामेषु पठद्भ्यः बालकेभ्यः गुणवत्तापूर्णशिक्षा अवश्यं प्रापणीया। ग्रामीणविद्यार्थिभ्यः गृहस्य समीपे उत्तमशिक्षां प्रदातुं प्रदेशे १५६ तः अधिकाः सीबीएसई-विद्यालयाः उद्घाटिताः सन्ति। एतेषां विद्यालयानां प्रारम्भानन्तरं विद्यार्थिनां नामाङ्कने प्रायः २४ सहस्राणां वृद्धिः अभवत्। एतेषां सञ्चालनाय आधारभूतसंरचनायै च ८० कोटिरूप्यकाणि निर्गतानि सन्ति। मुख्यमन्त्रिणा उक्तं यत् उच्चशिक्षायां शिक्षकाणां न्यूनतां दूरीकर्तुं सर्वकारः नीतिं निर्माति। उपलब्धसंसाधनानां उत्तमोपयोगाय महाविद्यालयानां युक्तिकरणमपि करिष्यते। युवभ्यः सर्वकारीयक्षेत्रे जीविकायाः अवसरान् प्रदातुं राज्यचयनायोगस्य हिमाचलप्रदेशलोकसेवायोगस्य च माध्यमेन चयन-परीक्षाः आयोज्यन्ते।

## नियुक्ति-परीक्षासु पारदर्शितायाः विश्वासः

सुक्खुना उक्तं यत् वर्तमानसर्वकारस्य कार्यकाले एकस्यामपि चयन-परीक्षायाः प्रश्नपत्रं प्रकटितं न अभवत्। तेन पूर्ववर्तिन्याः भाजपासर्वकारस्य कार्यकाले प्रकाशं गतानां पुलिसनियुक्तिसम्बद्धानां, कर्मचारीचयनायोगसम्बद्धानां च प्रश्नपत्र- प्रकटन- प्रकरणानाम् उल्लेखः कृतः।

तेन उक्तं यत् कांग्रेससर्वकारस्य सत्तायाम् आगमनानन्तरं कर्मचारीचयनायोगः विघटितः तथा चयन-परीक्षायाः प्रश्नपत्रं प्रकटन- कर्तॄन् कारागारे प्रेषिताः। अनेकेषु नियुक्तिप्रकरणेषु अनिवार्य- साक्षात्कारं समाप्य योग्यताधारित- चयनव्यवस्था प्रवर्तिता अस्ति।

# स्वातन्त्र्यदिवसे हिमाचले ४३३ कारागारे बद्धानां दण्डे भविष्यति शिथिलता, त्रयः मोचयिष्यन्ते

हिमसंस्कृतवार्ताः:- शिमला।प्रदेशस्य विभिन्नेषु कारागारेषु निरुद्धेषु कुलं १,०२५ सिद्धदोषकाराबद्धेषु ४३३ पात्रकाराबद्धेभ्यः दण्डे विशेषः परिहारः प्रदास्यते। दण्डावधेः समाप्तेः अनन्तरं त्रयः बन्दिनः अगस्तमासस्य १५ दिनाङ्कस्य पूर्वसन्ध्यायां कारागारात् विमोचयिष्यन्ते।

स्वातन्त्र्यदिवसस्य अवसरे हिमाचलप्रदेशसर्वकारेण राज्यस्य कारागारेषु निरुद्धेभ्यः सदाचरणसम्पन्नेभ्यः दण्डितकाराबद्धेभ्यः विशेषां सहायतां प्रदातुं निर्णयः कृतः अस्ति। प्रदेशस्य विभिन्नेषु कारागारेषु निरुद्धेषु आहत्य १,०२५ सिद्धदोषकाराबद्धेषु ४३३ पात्रकाराबद्धेभ्यः दण्डे विशेषः परिहारः प्रदास्यते। दण्डावधेः समाप्तेः अनन्तरं त्रयः बन्दिनः अगस्तमासस्य १५ दिनाङ्कस्य पूर्वसन्ध्यायां कारागारात् विमोचयिष्यन्ते। सर्वकारेण दण्डावधिम् अनुसृत्य परिहारस्य विभिन्नाः श्रेण्यः निर्धारिताः सन्ति। ये पात्रकाराबद्धाः दशवर्षाधिकां दण्डावधिं वा आजीवनकारावासदण्डं वा भुञ्जते, तेभ्यः त्रयः मासाः परिहारः प्रदास्यते। ये पञ्चवर्षाधिकां दशवर्षपर्यन्तं च दण्डावधिं भुञ्जते, तेभ्यः द्वौ मासौ, ये त्रिवर्षाधिकां पञ्चवर्षपर्यन्तं च दण्डावधिं भुञ्जते, तेभ्यः पञ्चचत्वारिंशत् दिनानि, तथा ये एकवर्षाधिकां त्रिवर्षपर्यन्तं च दण्डावधिं भुञ्जते, तेभ्यः त्रिंशत् दिनानि परिहारः प्रदास्यते। **परिहाराय अपात्राः श्रेण्यः-**

विशेषपरिहारस्य लाभः सर्वेभ्यः काराबद्धेभ्यः न प्रदास्यते। सर्वकारेण गम्भीरेषु जघन्येषु च अपराधेषु दोषसिद्धिं प्राप्तवन्तः बन्दिनः अस्य परिहारस्य परिधेः बहिः स्थापिताः सन्ति। एनडीपीएस- अधिनियमस्य अन्तर्गतं मादकद्रव्याणां तस्करीसम्बद्धेषु प्रकरणेषु दण्डं भुञ्जानाः काराबद्धाः, पॉक्सो-अधिनियमस्य अन्तर्गतं बालकेभ्यः विरुद्धेषु यौनापराधेषु दोषसिद्धिं प्राप्तवन्तः, भ्रष्टाचारनिवारण- अधिनियमस्य, यूएपीए-अधिनियमस्य अन्तर्गतं दोषसिद्धिं प्राप्तवन्तः बन्दिनः च परिहारस्य पात्राः न भविष्यन्ति। आतङ्कवादीक्रियाकलापेषु, मोचनधनार्थम् अपहरणस्य प्रकरणेषु दण्डं भुञ्जानाः काराबद्धाः अपि परिहारं न प्राप्स्यन्ति। तदतिरिक्तम् स्वभावेनापराधिनः, पैरोलस्य नियमानां उल्लङ्घनं कृत्वा पलायिताः पैरोल-जम्पराः, निवारकबन्धने स्थापिताः बन्दिनः तथा अन्यासु प्रतिबन्धितश्रेणीषु अन्तर्भूताः काराबद्धाः अपि अस्मात् लाभात् वञ्चिताः भविष्यन्ति।

**काराबद्धानां सदाचरणे बलम्**-वरिष्ठ-सहायकमहानिरीक्षकः (कारागार एवं सुधारात्मक-सेवाः) सुशीलकुमारः अवदत् यत् कारागारेषु सदाचरणं सुधारात्मकदृष्टिकोणं च प्रोत्साहयितुम् उद्दिश्य सर्वकारेण अयं निर्णयः कृतः अस्ति। दण्डे परिहारेण पात्रकाराबद्धेभ्यः निर्धारितावधेः पूर्वमेव स्वपरिवारस्य मध्ये प्रत्यागन्तुं समाजस्य मुख्यधारायां पुनर्वसनस्य च अवसरः प्राप्स्यते। तथैव कारागारेषु परिष्कारात्मक- वातावरणस्य प्रोत्साहने, काराबद्धेषु सकारात्मकपरिवर्तनाय प्रेरणां प्रदातुं च अयं निर्णयः महत्त्वपूर्णः मन्यते। प्रदेशस्य कारागारेषु विद्यमानेषु १,०२५ सिद्धदोषकाराबद्धेषु ४३३ जनानां आश्रयप्राप्त्या कारागारप्रबन्धनस्य परिष्कारात्मक- सेवानां च स्तरेऽपि सकारात्मकः प्रभावः भविष्यति इति अपेक्षा अस्ति।

# अमृतवाणी

✍ नारदोपाध्यायः, असम

तव, मम च मध्ये स्थिता भित्तिः (भेदः) केवलं शब्दस्य हि वर्तते। यदा स शब्दो निपतेत्, तदा केवलं प्रेम हि शिष्यते। समाजे या विभ्रान्तिः, विच्छिन्नता वा स्यात्, तस्य समाजस्य संयोजकत्वेन कश्चन नवप्रकाशोऽपि जगति विद्यमानो भवति।

प्रथमतः त्वं मानवो भव, तदनन्तरं हि हिन्दुः, मुस्लिमः, शिखः, ईशाय वा भव। यतोहि श्मशाने, यमलोके वा तव का जातिः, को धर्मसम्प्रदायः, इति न पृच्छयते, अपितु कर्म हि विचार्यते। आदौ स्वकीये अन्तःकरणे प्रवर्तमानं युद्धं नाशय, तदा बहिर्जगति दृश्यमानं सर्वप्रकारकं युद्धं स्वयमेव विनश्यति।

दीपात् हि दीपं प्रज्वलति, तस्मात् इतरेषां सहायको भव। आदौ अहमिति, त्वमिति भेदं पूर्णतः अपसारय, पुनः पश्य- नाहं त्वया भिन्नः स्यामिति लोक्यते। सर्वं कठिनं स्यात्, तस्मात् धैर्यं धर; जलमपि यथाकालं पाषाणं छेत्तुमर्हति। प्रसन्नता त्वां न अन्वेषयति, अपि तु त्वं हि ततः पलायनं कुर्वन्नसि, तिष्ठ। त्वं समुद्रस्य एकबिन्दुमात्रं न, अपि तु त्वं पूर्णसमुद्रस्य एकस्मिन् बिन्दौ वर्तसे इति।



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

# लौकिकन्यायकोशः

## चम्पक- पटन्यायः

कस्मिन्नपि वस्त्रे कस्यामपि पेटिकायां वा चम्पकपुष्पाणि स्थापितानि चेत् एतावान् सुगन्धो भवति यत् पुष्पाणि अपनीतानि चेदपि सः सुगन्धः तत् वस्त्रं तां पेटिकां वा व्याप्य तत्र भवति। सज्जनानां संगतिरपि एवम् अधिककालं यावत् जीवनं सुगन्धयतीति न्यायस्य अस्य आशयः।

# भारत- विभाजन- विभीषिका स्मृतिदिवसे इतिहासविभागे विशेषकार्यक्रमः आयोजितः




**हिमसंस्कृतवार्ताः**-सरदारपटेलविश्वविद्यालय मण्डी इत्यस्य इतिहासविभागेन भारतविभाजन-विभीषिका- स्मृतिदिवसस्य अवसरे विश्वविद्यालयस्य माण्डवपरिसरे एकस्य विशेषकार्यक्रमस्य आयोजनं कृतम्। कार्यक्रमे विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः ललितकुमार अवस्थी मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षताम् अकादमिक- विषय- अधिष्ठाता डॉ. पवनकुमार चान्दः अकरोत्, डॉ. जय इन्द्रपालः विशिष्टातिथिरूपेण उपस्थितः आसीत्। मुख्यवक्तृरूपेण प्रो. धर्मचन्दचौबे (आचार्यः विभागाध्यक्षश्च, बृहत्तर-भारत- क्षेत्रीय- अध्ययनविभागः, इन्दिरागान्धी-राष्ट्रिय- कला- केन्द्रम्, नवदेहली, संस्कृतिमन्त्रालयः, भारतसर्वकारः) उपस्थितः आसीत्।सर्वप्रथमं मुख्यातिथिः आचार्यः ललितकुमार अवस्थी अन्ये च प्रबुद्धजनाः इतिहासविभागेन भारतविभाजन- विभीषिकया सम्बद्धायाः विशेषप्रदर्शिन्याः अवलोकनं कृतवन्तः। प्रदर्शिन्यां विभाजनकाले विस्थापनं, मानवीयां पीडां, सामाजिकविघटनं, शरणार्थिनां पुनर्वासं, विभाजनेन सम्बद्धान् ऐतिहासिकप्रलेखान् चित्राणि च प्रदर्शितवन्तः। प्रदर्शिनी आगन्तुकान् वर्षे १९४७ तमस्य तस्याः त्रासदघटनायाः मानवीयपक्षेण परिचितम् अकारयत्, यया लक्षाधिकजनानां जीवनं प्रभावितम् आसीत्। शुभारम्भावसरे कार्यक्रम संयोजकः विकेशकुमारः अतिथीनाम् उपस्थितजनानां च स्वागतं कुर्वन् कार्यक्रमस्य रूपरेखाम् उद्देश्यं च उपस्थापितवान्। इतिहास विभागाध्यक्षः डॉ. राकेशकुमारशर्मा अतिथीनां स्वागतं कुर्वन् भारतविभाजन- विभीषिका– स्मृतिदिवसस्य ऐतिहासिकमहत्त्वे विस्तारेण प्रकाशं निक्षिपन् अवदत् यत् वर्षे १९४७ तमस्य विभाजनं भारतीय-इतिहासस्य सर्वाधिकपीडादायक- घटनासु एकम् आसीत्।मुख्यातिथिः आचार्यः ललितकुमार अवस्थी स्वसम्बोधने अवदत् यत् भारतविभाजन-विभीषिका- स्मृतिदिवसः तेषाम् असङ्ख्यजनानां पीडायाः, सङ्घर्षस्य, बलिदानस्य च स्मरणस्य अवसरः अस्ति, ये विभाजनस्य काले अपारं कष्टं सोढवन्तः। सः अकथयत् यत् इतिहासस्मरणस्य उद्देश्यं कञ्चित् प्रति वैमनस्यम् उत्पादयितुं नास्ति, अपि तु अतीतस्य घटनाभ्यः शिक्षां गृहीत्वा एकस्य अधिक सशक्तस्य, समरसस्य, सङ्गठित भारतस्य च निर्माणं भवेत्। सः छात्रान् इतिहासम् प्रति वैज्ञानिकं संवेदनशीलञ्च दृष्टिकोणं विकासयितुम् आहूतवान्। सः इतिहासविभागेन विभाजन- विभीषिका स्मृतिदिवसस्य अवसरे आयोजितायाः प्रदर्शिन्याः कार्यक्रमस्य च श्लाघां कुर्वन् अवदत् यत् एतादृशानि आयोजनानि छात्रान् इतिहासस्य मानवीयपक्षेण सह योजयितुं महत्त्वपूर्णाम् भूमिकां निर्वहन्ति।मुख्यवक्ता प्रो. धर्मचन्द चौबे आभासीमाध्यमेन स्ववक्तव्यं प्रस्तौति स्म, सः अवदत् यत् एषः दिवसः केवलम् अतीतस्य एकस्याः त्रासदघटनायाः स्मरणस्य अवसरः नास्ति, अपि तु तेषाम् असङ्ख्यजनानां सङ्घर्षस्य, पीडायाः, विस्थापनस्य, साहसस्य, मानवीय संवेदनानां च स्मरणस्य अवसरः अस्ति, ये भारत विभाजनस्य विभीषिकां सोढवन्तः। सन् १९४७ तमस्य विभाजनं भारतीय इतिहासस्य सर्वाधिक पीडादायक घटनासु एकम् आसीत्। अद्य वयं तान् सर्वान् ज्ञात अज्ञात व्यक्तीन् श्रद्धापूर्वकं स्मरामः, ये विभाजनस्य त्रासद घटनायां स्वप्राणान् त्यक्तवन्तः, स्वपरिवारान् अहारयन्, विस्थापनस्य कठिनं जीवनं च जीवितवन्तः। तेन सह एव तेषां जनानां साहसाय धैर्याय च नमस्कुर्मः, ये विपरीतासु परिस्थितिषु स्व जीवनं पुनः स्थापितवन्तः, राष्ट्र निर्माणे च महत्त्वपूर्णं योगदानं दत्तवन्तः।कार्यक्रमस्य अध्यक्षतां कुर्वन् डॉ. पवनकुमार चान्दः अवदत् यत् विभाजनस्य स्मृतयः अद्य अपि अनेकेषां परिवाराणां समुदायानां च सामूहिक चेतनायां विद्यमानाः सन्ति। डॉ. जय इन्द्रपालः अपि विभाजनस्य ऐतिहासिकपृष्ठभूमौ तस्य दूरगामिप्रभावेषु च स्व विचारान् प्रकटितवान्। कार्यक्रमे डॉ. कर्णगुप्ता, डॉ. लखवीरसिंहः, इतिहासविभागाध्यक्षः डॉ. राकेशकुमारशर्मा, सहायक- आचार्यः राजेशशर्मा, कृष्णचन्दः, शोधार्थी वेदप्रकाशः, राहुलकुमारः, सुरेखा, डोल्मा, मण्डीनगरस्य प्रबुद्धजनाः प्रो. हर्ष ओबरायः, डॉ. राकेश कपूरः, नरेश मल्होत्रा, अनिलशर्मा, मुरारी लालः, रवि वैद्यः, कन्हैयालाल सैनी, जगदीश कपूरः, कमलकान्तः, हेमन्तकुमारश्च एतैः सह इतिहासविभागस्य छात्राः च उपस्थिताः आसन्।

# भारतीयप्रौद्योगिकीसंस्थाने, मुम्बय्यां संस्कृतपठनाय वैश्विकप्रतिसादः

## भारतसहितं विश्वस्य विभिन्नेभ्यः देशेभ्यः संस्कृताध्येतॄणां सहभागः

**प्रणव गोगटे, हिमसंस्कृतवार्ता।**

भारतीयप्रौद्योगिकीसंस्थानस्य संस्कृत-अध्ययनकेन्द्रद्वारा "सहस्रमुखेषु संस्कृतम्" इति उद्देश्येन संस्कृतस्य व्यापकप्रचाराय नूतनाः २०२६–२७ तमवर्षस्य संस्कृतपाठ्यक्रमाः प्रारब्धाः। संस्कृतभाषां जनसामान्येषु अधिकाधिकं प्रसारयितुं तथा जनानां संस्कृतेन सह सम्बन्धं दृढीकर्तुं प्रवर्तमानस्य अस्य ध्येयस्य अन्तर्गतं प्रारब्धेषु प्रत्यक्ष-अन्तर्जाल-माध्यमयोः पाठ्यक्रमेषु उत्साहपूर्णः प्रतिसादः प्राप्तः अस्ति। नूतनप्रारब्धयोः संस्कृतपरिचयः (प्रमाणपत्रपाठ्यक्रमः), संस्कृत-वाङ्किता (पदविकापाठ्यक्रमः) इत्येतयोः पाठ्यक्रमयोः च अधुना एव प्रायः १२५ छात्राः प्रवेशं प्राप्तवन्तः। अयं प्रतिसादः केवलं भारतीयप्रौद्योगिकीसंस्थानं, मुम्बयी तथा भारतस्य विभिन्नप्रदेशान् एव न व्याप्नोति, अपि तु संयुक्तराज्य-अमेरिका, यूनाइटेड किङ्ग्डम, फ्लोरिडा, मलेशिया, ऑस्ट्रेलिया, दक्षिण-अफ्रिका, मस्कट इत्यादिभ्यः विश्वस्य विभिन्नेभ्यः स्थानेभ्यः अपि छात्राः अस्मिन् पाठ्यक्रमे सहभागीभवन्ति। संरचितेन सुलभेन च अध्ययनक्रमेण संस्कृतं ज्ञातुं जनानां वर्धमानः उत्साहः अनेन सहभागित्वेन स्पष्टतया दृश्यते।



भारतीय- प्रौद्योगिकी- संस्थानस्य संस्कृत-अध्ययनकेन्द्रस्य, कविकुलगुरु- कालिदास-संस्कृतविश्वविद्यालयस्य, नागपुरस्य संयुक्ततत्त्वावधानेन एतौ पाठ्यक्रमौ सञ्चाल्येते। प्रत्यक्ष- अन्तर्जाल- माध्यमाभ्यां पाठ्यक्रमयोः आयोजनं क्रियते, येन विभिन्नेषु प्रदेशेषु निवसन्तः संस्कृतप्रेमिणः अपि अस्याः संस्कृताध्ययन-परम्परायाः सहभागिनः भवितुं शक्नुवन्ति। संस्कृतपरिचयः इति पाठ्यक्रमः संस्कृतस्य पूर्णतया नवशिक्षार्थिभ्यः निर्मितः अस्ति। अस्मिन् पाठ्यक्रमे प्रवेशाय पूर्वसंस्कृतज्ञानस्य आवश्यकता नास्ति।संस्कृतवाङ्किता इति पाठ्यक्रमः तेषां + शिक्षार्थिनां कृते अस्ति, ये पूर्वमेव संस्कृतस्य मूलभूतं प्रमाणपत्रं प्राप्तवन्तः तथा संस्कृताध्ययने अग्रे प्रगतिं कर्तुम् इच्छन्ति। विशेषतः अन्तर्जालमाध्यमेन सञ्चालितः पाठ्यक्रमः अस्य कार्यक्रमस्य वैश्विकविस्ताराय महत्त्वपूर्णं साधनम् अभवत्। विभिन्नदेशेभ्यः विभिन्नसमयक्षेत्रेभ्यश्च संस्कृतप्रेमिणः पाठेषु सहभागीभूत्वा भारतीय- प्रौद्योगिकी-संस्थानस्य संस्कृताध्ययनकेन्द्रेण सह सम्बद्धाः भवन्ति। नूतनपाठ्यक्रमयोः प्राप्तः अयम् उत्साहपूर्णः प्रतिसादः दर्शयति यत् संस्कृतं केवलम् एका प्राचीना भाषा न, अपि तु संवादभाषा, ज्ञानस्य भाषा तथा सांस्कृतिक- सम्बन्धस्य माध्यमम् इति रूपेण अपि जनान् आकर्षयति। विश्वस्य विभिन्नेभ्यः भागेभ्यः प्राप्तं एतत् सहभागित्वं "सहस्रमुखेषु संस्कृतम्" इति ध्येयस्य पूर्तये महत्त्वपूर्णं पदम् अस्ति।

**प्रवेशस्य अवसरः अद्यापि उपलब्धः**

ये जनाः २०२६–२७ तमवर्षस्य संस्कृतपाठ्यक्रमेषु प्रवेशं प्राप्तुम् इच्छन्ति, ते अद्यापि स्वनाम पञ्जीकर्तुं शक्नुवन्ति। पञ्जीकरणस्य अन्तिमतिथिः ३१ अगस्त् २०२६ अस्ति। प्रवेशः उपलब्धानां स्थानानाम् आधारेण भविष्यति।



**हिमसंस्कृतवार्ताः-**
**गीता शुक्ला, उत्तर प्रदेशः।**

# स्वातन्त्र्यदिवसः-
# राष्ट्र गौरवस्य महापर्वः

"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।" इति भारतीयसंस्कृतेः महान संदेशः अस्ति। जन्मभूमिः अस्माकं जीवनस्य आधारः, संस्कृतेः मूलम्, अस्माकं गौरवस्य कारणं च अस्ति। तस्याः रक्षणं सम्मानः तथा उन्नतिः प्रत्येकस्य भारतीयस्य परमं कर्तव्यम् अस्ति। प्रतिवर्षम् अगस्तमासस्य पञ्चदशे दिने भारतदेशे स्वातंन्त्र्य दिवसः महता उत्साहेन, हर्षेण राष्ट्रभक्त्या च आचर्यते।अस्मिन एव दिवसे सन् 1947 तमे वर्षे, भारतः दीर्घकालीनात् पराधीनत्वात् विमुक्तः अभवत्। एषा स्वतंत्रता सहजतया न प्राप्ता अपि तु असंख्यानाम् स्वतंत्रता सेनानीनाम् त्यागेन, तपसा संघर्षेण, बलिदानेन च लब्धा। तेषां महनीयानां जीवनम् अस्माकं कृते सदा प्रेरणा स्रोतः अस्ति। महात्मा गांधी, नेताजी सुभाषचंद्रबोसः, भगतसिंहः, चंद्रशेखर आजादः, सरदार वल्लभभाई पटेलः, रानी लक्ष्मीबाई इत्यादयः महापुरुषाः स्वदेशस्य स्वातंत्रतायै स्वप्राणान् अपि अर्पितवन्तः। तेषां साहसं धैर्यं राष्ट्रनिष्ठा च अस्मान् स्वकर्तव्य पालने प्रेरयन्ति।

स्वातन्त्र्यस्य अर्थः केवलं पराधीनतायाः अभावः न अपितु उत्तरदायित्वस्य स्वीकृतिः अपि अस्ति। यदि वयं राष्ट्रस्य आदर्शाः नागरिकाः भवितुम् इच्छामः, तर्हि सत्यम् वदेम अनुशासनं पालयेम, पर्यावरणस्य संरक्षण कुर्याम्, स्वच्छतां वर्धयेम्। संविधानस्य सम्मानं च कुर्मः, विशेषतः विद्यार्थिनां कर्तव्यं भवति यत् मनोयोगेन अध्ययन कुर्वन्तुः, गुरुन् मातापितृन् सम्मानयन्तु स्वचरित्रं निर्मलं धारयन्तु, राष्ट्रस्य उज्जवल भविष्य निर्माणे योगदानम् ददतु।

भारतम् अनेकभाषा- अनेक धर्म-अनेकसंस्कृतिसम्पन्नं राष्ट्रम् अस्ति तथापि "विविधतायाम् एकता "अस्माकं राष्ट्रस्य वैशिष्ट्यम् अस्ति। अतः वयं सर्वे भेदभावं परित्यज्य प्रेम्णा, सौहार्देन, सहयोगेन च जीवनं यापयेम। अद्य अस्माभिः दृढ़ संकल्पः करणीयः- "राष्ट्रहितं मम प्रथमं कर्तव्यम्" स्वदेशस्य गौरवं वर्धयेम, राष्ट्रध्वजस्य मानं रक्षेम, भारतमातुः सेवायै सर्वदा तत्पराः भवेम। जयतु भारतम्। वन्दे मातरम्।

# संस्कारभारती-बोकारो-जनपद-एककेन काव्याञ्जलिः सह गुरुसम्मान-समारोहश्च आयोजितः




**संवाददाता प्रेरकः च -सौरभः दे**

सङ्गीतज्ञः डॉ. राकेशरञ्जनः, लिपि बोस-महोदया तथा रङ्गकर्मी बिमलसहायः गुरुसम्मानेन सम्मानिताः।

बोकारो। साहित्यस्य ललितकलानां च अखिलभारतीय-संस्था संस्कारभारती इत्यस्याः बोकारो-जनपद-इककया गुरुवासरे सायंकाले सेक्टर-4 डी-स्थिते शिव-हनुमान-मन्दिर-परिसरे 'काव्याञ्जलिः सह गुरुसम्मान-समारोहः' आयोजितः।

स्वागत-सम्भाषणे महामन्त्री स्वरूपशेखरपाण्डेयः कार्यक्रमस्य उद्देश्यम् अवर्णयत्। अध्यक्षः अमरजीसिन्हा संस्कारभारत्याः ध्येयगीतस्य "साधयति संस्कारभारती भारते नवजीवनम्..." इत्यस्य सुमधुरं गायनं प्रस्तुतवान्। बालकलाकारा आन्वी आशी च सुमधुरां शिववन्दनां प्रस्तुतवती।

अस्मिन् अवसरे समारोहस्य मुख्यातिथिः संस्कारभारत्याः अखिलभारतीय-मन्त्री तथा सङ्गीतनाटक-अकादम्याः सदस्यः डॉ. संजयकुमारचौधरी इत्यनेन प्रसिद्धः तबलागुरुः तथा भारतीय-सङ्गीत-कला-अकादम्याः बोकारो-सचिवः डॉ. राकेशरञ्जनः, सङ्गीतशिक्षिका लिपि बोसमहोदया तथा वरिष्ठः रङ्गकर्मी बिमलसहायः च संस्कारभारती-बोकारो-जनपद-इकायाः पक्षतः गुरुसम्मानेन सम्मानिताः।

स्वीयसम्भाषणे डॉ. चौधरीमहोदयः अवदत् यत् डॉ. राकेशरञ्जनः बालकेभ्यः सङ्गीतशिक्षां प्रददाति। सः बोकारोनगरे भारतीय-सङ्गीत-कला-अकादम्याः वार्षिक-सङ्गीत-समारोहमाध्यमेन विगतेभ्यः अनेकदशकेभ्यः प्रायः प्रतिवर्षं उच्चस्तरीयं सङ्गीतकार्यक्रमम् आयोजयति। तेन सङ्गीत-नृत्ययोः क्षेत्रे देशस्य प्रसिद्धाः कलाकाराः अत्र स्वकीयाः प्रस्तुतयः ददति, येन अत्रत्याः सङ्गीतप्रेमिणः तेषां कलाप्रस्तुतीनां आनन्दं लभन्ते।

सङ्गीतगायनक्षेत्रे गुरुः लिपि बोसमहोदया तथा रङ्गमञ्च-अभिनयक्षेत्रे बिमलसहायः इत्यनयोः योगदानमपि अत्यन्तं प्रशंसनीयम् अस्ति, इति सः उक्तवान्। अस्मिन् अवसरे संस्कारभारती-बोकारो-जनपद-इकायाः साहित्य-कला-प्रमुखयोः अरुणपाठकस्य क्रान्तिश्रीवास्तवस्य च संयोजनेन काव्याञ्जलि-कार्यक्रमः आयोजितः। तत्र कवयः मनोजोपाध्यायः उर्फ् सुमनजी, अनिलकुमारश्रीवास्तवः, अरुणपाठकः, कवयित्र्यः करुणाकलिका, काजलभालोटिया, गीताकुमारी 'गुस्ताख', डॉ. रञ्जनाश्रीवास्तवः, रिङ्कूगिरिः, जयन्तीसिंहः, क्रान्तिश्रीवास्तवः च देशभक्तिं, सावनकालं, प्रकृतिं, प्रेम तथा मानवीय-संवेदनाभिः परिपूर्णाः स्वकीयाः रचनाः प्रस्तुतवन्तः। तेषां काव्यपाठेन उपस्थितानां सर्वेषां प्रशंसा प्राप्ता। काव्याञ्जलि-कार्यक्रमस्य अध्यक्षता अरुणपाठकेन कृता तथा सञ्चालनं क्रान्तिश्रीवास्तवेन कृतम्।

अस्मिन् अवसरः संस्कारभारती-बोकारो-जनपद-इकायाः उपाध्यक्षः रामाशीषसिंहः, मन्त्री अर्चनाचौधरी, संरक्षक-मण्डलस्य सदस्या प्रभामोहनन्नायरः, नृत्यविधाप्रमुखा रजनीपाढी, नाट्यविधाप्रमुखः शम्भुझा, तथा श्रीपर्णाघोषः, आरतीरञ्जनः, रीनासिन्हा, अरूप्रक्षितः, शङ्करप्रजापतिः, मन्दिरस्य व्यवस्थापकः पं. के. के. एन. तिवारी इत्यादयः बहवः कलाप्रेमिणः उपस्थिताः आसन्।

**रविः खरिडेहालः - बेङ्गलूरु।**

## "आयातः-निर्यातः व्यापारूनत्व-सङ्ख्या विस्तारिता"




०७-२०२५ तमे वर्षे समस्त-निर्यातः ७०.७२ बिलियन् डॉलरः आसीत् । तस्मिन् एव काले समस्त-आयातः ८२.१६ बिलियन् डॉलरः अभवत् ।

०७-२०२६ यावत् तदनुरूपाः सङ्ख्याः निर्यातः ८०.१४ बिलियन् डॉलरः आयातः च ९०.१५ बिलियन् डॉलरः ।व्यापारविविधतायाः कारणेन निर्यातस्य वृद्धिः अभवत्।पुनः मार्गनिर्धारणस्य कारणेन अपि पुनर्प्राप्तिः अभवत् । सामग्री-निर्यातः २०% इत्येव वर्धितः तथा च सामग्री-आयातः अपि वर्धितः परन्तु १७.५% इत्येव तुल्यकालिकरूपेण मन्दः अभवत् ।

०७-२०२५ तमे वर्षे व्यापारूनत्व-सङ्ख्या ११.४ बिलियन् डॉलरः आसीत् ।

०७-२०२६ तमे वर्षे व्यापारूनत्व-सङ्ख्या १५ बिलियन् डॉलरः अस्ति ।

पूर्वम् उल्लिखितानां कारकानां कारणेन निर्यातस्य वृद्धिः अभवत् चेदपि निर्यातक्षेत्रे सेवासु मन्दवृद्धिः आयातक्षेत्रे सेवासु द्रुतवृद्धेः विरुद्धं व्यापारूनत्व-सङ्ख्या विस्तारितः अस्ति।

# सनातनधर्म-आदर्श-संस्कृतमहाविद्यालये, डोहग्यां भव्य-तिरङ्गा-यात्रायाः आयोजनम्






**डोहगी, ऊना।** सनातनधर्म-आदर्श-संस्कृतमहाविद्यालये, डोहगी-ऊना इत्यत्र देशभक्तेः राष्ट्रियैकतायाः च भावनां सुदृढीकर्तुं स्वातन्त्र्यदिवसस्य पूर्वसन्ध्यायां भव्यायाः तिरङ्गा-यात्रायाः आयोजनं कृतम्। अस्यां यात्रायां महाविद्यालयस्य एन.एस्.एस्. (N.S.S.) स्वयंसेवकैः सह समस्तेन आचार्यवर्गेण विद्यार्थिभिः च उत्साहपूर्वकं भागः गृहीतः।

तिरङ्गा-यात्रा बङ्गाणा-डोहगी-क्षेत्रयोः विविधभागेषु सञ्चालिता। हस्तेषु राष्ट्रध्वजं तिरङ्गं धृत्वा विद्यार्थिभिः स्वयंसेवकैश्च देशभक्तिपरैः जयघोषैः वातावरणं राष्ट्रभक्त्या ओतप्रोतं कृतम्। यात्रायाः माध्यमेन विद्यार्थिभ्यः राष्ट्रं प्रति समर्पणस्य, एकतायाः, अखण्डतायाः, देशभक्तेश्च भावनायाः सन्देशः प्रदत्तः। एन.एस्.एस्. अधिकारी डा. नरेन्द्रकुमारः सर्वान् स्वयंसेवकान् विद्यार्थिनश्च तिरङ्गा-यात्रायाः सफलायोजनाय प्रेरितवान्। कार्यक्रमस्य अन्ते आयोजितायाः सभायाः अध्यक्षता प्रभारिप्राचार्येण आचार्येण डा. केदारदत्तपुरोहितेन कृता। सः विद्यार्थिभ्यः शुभकामनाः प्रदाय अवदत् यत् एतादृशानि राष्ट्रियपर्वाणि एवंविधाश्च कार्यक्रमाः युवपीढ्यां राष्ट्रप्रेम्णः राष्ट्रियचेतनायाश्च जागरणे महत्त्वपूर्णां भूमिकां निर्वहन्ति।मुख्यवक्ता डा. मुकेशकुमारः स्वसम्बोधने देशभक्तानां बलिदानं तथा महान्-क्रान्तिकारि-देशभक्तस्य हुतात्मनः (शहीद) उधमसिंहस्य जीवनं, सङ्घर्षं, राष्ट्रं प्रति तस्य अदम्यसमर्पणं च निरूपितवान्। सः अवदत् यत् हुतात्मनः उधमसिंहस्य जीवनं युवेभ्यः साहसस्य, त्यागस्य, सङ्कल्पस्य, राष्ट्रभक्तेश्च प्रेरणायाः स्रोतः अस्ति। सः विद्यार्थिनः अमरहुतात्मनाम् आदर्शान् स्वजीवने आत्मसात्कर्तुम् आह्वानम् अकरोत्।तिरङ्गा-यात्राकार्यक्रमस्य सफलायोजने महाविद्यालयस्य छात्राणां नेतृत्वं श्रीआदित्यशर्मा, श्रीशुभमशर्मा, सुश्री नैन्सी, श्रीसचिनः, श्रीसत्यमोपाध्यायः, श्रीविनायकः, श्रीसत्यमसरोचः इत्यादिभिः छात्रैः कृतम्। कार्यक्रमस्य सञ्चालनम् अन्तिमवर्षस्य छात्रया शिखासुमियालमहोदयया कृतम्।अस्मिन् कार्यक्रमे महाविद्यालयस्य आचार्याः डा. राजिन्द्रकुमारशर्मा, श्रीरविकन्यालः, डा. कृष्णादेवी, सुश्री अनीताराणी, श्रीमती अञ्जुबनियालः, डा. महेशशर्मा, श्रीविक्रमबाद्यकरः, श्रीमती कपिलापुरोहिता, डा. अरुणाशर्मा, श्रीमती पूजाशर्मा तथा समस्तेभ्यः विद्यार्थिभ्यः, आचार्येभ्यः, एन.एस्.एस्. स्वयंसेवकेभ्यश्च सक्रिया सहभागिता प्राप्ता। तिरङ्गा-यात्रया सम्पूर्णे क्षेत्रे देशभक्तेः राष्ट्रियैकतायाश्च सन्देशः प्रसारितः।

# वार्तासंवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। वाराणस्याम् एका विचित्रा घटना दृष्टा। एकेन चोरेण आपणे स्नानं कृतम्, पेयं पीतं, नृत्यं च कृतम्। ततः तेन द्विचक्रिका अपहृता।

**नन्दिनी-** अहो, तेन चोरेण महती प्रसन्नता अनुभूता! परन्तु अमेरिकादेशे एकेन महासर्पेण विद्यालयः दग्धः। सः सर्पः ऊष्म-दीपं पातितवान् अस्ति, येन तत्र अग्निः प्रज्वलितः।

**काव्या-** सर्पेण प्रज्वलितः अग्निः? इदम् अतीव विचित्रम्। तडागे एकः मृतदेहः जनैः दृष्टः। परन्तु यदा आरक्षकैः तस्य हस्तः आकृष्टः, तदा सः पुरुषः उत्थितवान् अस्ति! तेन मद्यं पीतम्, ततः सः जले सुप्तवान् अस्ति।

**नन्दिनी-** मृतः इति चिन्तितः सुप्तः नरः! आश्चर्यम्। रोम-नगरे उष्णेन नद्याः जलं शुष्कम्। सा अनावृष्टिः एकेन प्राचीनेन नृपेण निर्मितं सेतुं दर्शितवती अस्ति।

**काव्या-** अनावृष्ट्या अनावृतः इतिहासः! अद्यतनाः सर्वाः विचित्राः वार्ताः अस्माभिः उक्ताः। शान्तिः भवतु।

# देशभक्तेः गीतैः एव सीमितं न स्वातन्त्र्यदिवसस्य उत्सवः, वेषभूषया अपि मातृभूमेः प्रेम्णः सन्देशः

**हिमसंस्कृतवार्ता।** प्रदेशस्य सर्वेषु भागेषु स्वातन्त्र्यदिवसस्य विषये युवकेषु बालकेषु च विशेषः उत्साहः दृश्यते। स्वातन्त्र्यदिवसे अस्मिन् वर्षे केवलं तिरङ्गध्वजस्य आरोहणेन देशभक्तिगीतैश्च उत्सवः सीमितः नास्ति, अपितु जनाः स्ववेषभूषायाम् अपि देशभक्तेः वर्णं समावेशयन्ति। वर्षे २०२६ तमे स्वातन्त्र्यदिवसस्य अवसरे तिरङ्गध्वजेन प्रेरितानि परिधानानि, पारम्परिकवेषाः, तिरङ्ग-उत्तरीयम्, कङ्कणानि, हस्तबन्धाः (रिस्ट बैंड) मुखरङ्गलेपनं च जनानां प्रियाः भवन्ति। वेशभूषासम्बद्धे अधुनातने प्रवाहे अपि तिरङ्गस्य त्रयाणां वर्णानाम् एकत्र धारणस्य स्थाने एकं वर्णं प्रमुखं कृत्वा शेषवर्णान् अलङ्कारोपकरणैः समावेशयितुं प्रवृत्तिः दृश्यते। युवतीनां मध्ये श्वेतसाटिकायाः अथवा सूट-वस्त्रस्य सह केसरियवर्णस्य अथवा हरितवर्णस्य अङ्गवस्त्र-धारणस्य प्रवृत्तिः प्रिया भवति।तिरङ्गवर्णयुक्ताः साटिकाः, लघुवस्त्रनिर्मिताः साटिकाः तथा चिकनकारी इत्यादयः पारम्परिकभारतीयवेषाः अपि स्वातन्त्र्यदिवसस्य कृते आकर्षकाः विकल्पाः मन्यन्ते। बहवः जनाः सम्पूर्णतिरङ्गवर्णस्य परिधानं न धृत्वा श्वेतकराङ्शुकस्य अथवा साटिकया सह तिरङ्गदुपट्टं, प्रतीकचिह्नं (ब्रोच) वा कङ्कणानि धृत्वा सरलतया देशभक्तेः सन्देशं दातुं सज्जाः सन्ति। करांशुक-पादांशुकाभ्यां सह नेहरू-उपरिवस्त्रस्य तिरङ्गप्रतीकस्य च संयोजनम् अपि आकर्षणस्य केन्द्रं जातम् अस्ति। बालकानां कृते तिरङ्गरिब्बन, केशबन्धः (हेयरबैंड), हस्तबन्धः तथा लघुप्रतीकयुक्तः वेषः प्रियः भवति। विद्यालयेषु आयोजितेषु स्वातन्त्र्यदिवस-कार्यक्रमेषु भगतसिंहस्य, नेताजी सुभाषचन्द्रबोसस्य, रानीलक्ष्मीबाय्याः तथा डॉ. ए.पी.जे. अब्दुलकलामस्य इत्यादीनां राष्ट्रनायकानां वेषधारणमपि अत्यन्तं लोकप्रियं भवति।




## मुखरङ्गलेपनं नवम् आकर्षणम्

अस्मिन् वर्षे स्वातन्त्र्यदिवसस्य उत्सवे मुखरङ्गलेपनमपि विशेषम् आकर्षणं भवति। बालकाः युवकाश्च कपोलयोः केसरियवर्णेन, श्वेतवर्णेन हरितवर्णेन च तिरङ्गध्वजस्य चित्रं कारयन्ति। केचन जनाः त्रिवर्णेन सह अशोकचक्रस्य चित्रमपि कारयन्ति। सामाजिकमाध्यमानां युगे एषः वेषः छायाचित्राणां रील-चित्राणां च कृते अपि अत्यन्तं प्रियः भवति। स्वातन्त्र्यदिवसस्य अवसरे मुखे तिरङ्गवर्णानां लघुचित्रनिर्माणस्य प्रवृत्तिः नवीना नास्ति, किन्तु २०२६ तमे वर्षे ताम् परिधानैः अलङ्कारोपकरणैश्च सह संयोज्य सम्पूर्णदेशभक्तिपूर्णं रूपं निर्मातुं प्रवृत्तिः दृश्यते।

## नखकलायां कङ्कणेषु च तिरङ्गः

महिलाः युवत्यश्च नखेषु तिरङ्ग-नखकला (नेल आर्ट) कारयित्वा केसरियवर्णस्य, श्वेतवर्णस्य हरितवर्णस्य च कङ्कणानि धृत्वा स्ववेषं पूर्णं कुर्वन्ति। केशेषु तिरङ्गरिब्बन, क्लिप तथा रबर-बैण्ड इत्यादीनि अपि प्रियाणि भवन्ति। विपण्यां उपलब्धानि लघु-तिरङ्गप्रतीकानि तथा प्रतीकचिह्नानि (ब्रोच) अपि साधारणवस्त्राणि स्वातन्त्र्यदिवसस्य वर्णैः रञ्जयितुं सरलः उपायः भवन्ति। एवं २०२६ तमस्य स्वातन्त्र्यदिवसस्य फैशन केवलं त्रिवर्णानां धारणपर्यन्तं सीमितं नास्ति, अपितु पारम्परिकभारतीयवेषैः, मुखरङ्गलेपनैः, नखकलया लघुभिः अलङ्कारोपकरणैश्च देशभक्तिं शैल्या सह संयोजयितुं अवसरः अभवत्।